* शंकर पाण्डुरङ्ग सम्पादित सायण भाष्य के विना, अन्य सब मूल संहिता प्रकाशकों नें ७ । ५४ । सूक्त को द्व्यृच माना है। परञ्च अनुक्रमणी में इसे एकर्च लिखा है। प्रतीत होता है कि रा० ह्वि० नें पंचपटलिका के आधार से ७ । ५४ को तो द्व्यृच माना है और आगे के सूक्त 'ये ते पन्थानोव' को एकर्च माना है । मेरी सम्मति में यहां उन्होंनें पटलिका के समझनें में भूल की है। पं० भगवद्दत्त जी नें भी पटलिका सम्पादन में 'ऋचं साम' मंत्र प्रतीक के आगे जो (५४) सूक्त का पता दिया है। वह भी राथादि अशुद्ध संहिताओं के आधार से ही उन्होंने दिया है । उनको भी यहां भूल उन्हीं संहिताओं के आधार से हुई है। वास्तव में 'ऋचं साम' का जो पता पटलिका में दिया गया है, वह प्रकाशित अथर्वसंहिताओं के ७ । ५४ । के २ मंत्र से जानना चाहिये था, परन्तु संहिता प्रकाशकों नें ७ । ५४ के १ मंत्र की प्रतीक जानकर 'ऋचंसाम' और 'ऋचंसाम यत्' मंत्रों का ५४ सूक्त को द्व्यृच बनाया है और 'ये ते पन्थानोव ७ । ५५ । को एक भिन्न सूक्त बनाया है। ठीक ऐसा होना चाहिये था कि 'ऋचंसामयजामहे' मंत्र का एकर्च

७ । ५४ । *२'ऋचं साम यत्' इति भृगुर्द्व्यृचमैन्द्रमानुष्टुभं द्वितीया विराट्परोष्णिक् ॥

७ । ५६ । १'तिरश्चि राजेः' इति सूक्तमष्टर्चमथर्वा मंत्रोक्तवृश्चिकदेवताकमानुष्टुभं †सपादा द्वितीया ‡वानस्पत्या । ४'अयं यो वक्रः' इति विराड्प्रस्तारपंक्ति §ब्राह्मणस्पत्यमुतेदमिति ॥ ७ ॥

७ । ५७ । १'यदाशसा' इति द्व्यृचं वामदेवोजागतं सारस्वतम् ॥

७ । ५८ । ‖१'इन्द्रा वरुणा सुतपौ' इति द्व्यृचं कौरुपथिर्मंत्रोक्तदेवत्यं जागतम् । द्वितीयात्रिष्टुप् ॥

७ । ५९ । १'यो नः शपात्' इति बादरायणिररिनाशनमंत्रोक्तदेवताकमानुष्टुभम् ॥

भिन्न सूक्त बनाते और 'ऋचंसाम यदप्राक्षं' तथा 'ये ते पन्थानोव' इन दो मंत्रों का एक भिन्न द्व्यृच सूक्त बनाते अनुक्रमणी और पटलिका से भी यही सिद्ध होता है ॥

* यह एकर्च है वा द्व्यृच यह निर्णय हम नें पृ० ७७ की टिप्पणी में कर दिया है ॥

† मूल लेखों में संपादा पढ़ा जाता है ॥

‡ ह्वि० नें 'ब्रा णस्पत्या' पाठ कल्पित किया है ॥

§ मूल लेखों में 'वानस्पस्त्याय' पाठ है ये दोनों पाठ शुद्ध क्या है ठीक रूप से पढ़े नहीं जाते ॥

‖७ ५८ सूक्त ऋ० ६ । ६८ । १०, ११ में है, वहां ऋषि 'भारद्वाज' बार्हस्पत्य है ॥

७ । ६० । १ 'ऊर्जं बिभ्रत्' इति सप्तर्चं । ब्रह्मा वास्तोष्पत्यमानुष्टुभम् । प्रथमा परानुष्टुप्त्रिष्टुबनेन *रम्यान्गृहान्वास्तोष्पतीनप्रार्थयत् ॥

७ । ६१ । १ 'यदग्ने' इति द्व्यृचमथर्वाग्नेयमानुष्टुभम् ॥

७ । ६२ । १ 'अयमग्निः' इत्याग्नेयम् ॥

७ । ६३ । १ 'पृतनाजितम्' इति मरीचिः काश्यप उभे जगत्यौ जातवेदसम् ॥

७ । ६४ । १ 'इदं यत् कृष्णः' इति द्व्यृचं यमोमंत्रोक्तदेवत्यमुत नैर्ऋतं । प्रथमा भुरिगनुष्टुप् । द्वितीया न्यंकुसारिणीबृहती ॥

७ । ६५ । १ 'प्रतीचीन फलः' इति तृचं शुक्रोऽपामार्गवीरुद्दैवतमानुष्टुभमनेन मंत्रोक्तां देवतां दुरितापमृष्टिमप्रार्थयत् ॥

७ । ६६ । १ 'यद्यन्तरिक्षे' इति ब्रह्मा ब्राह्मणं त्रिष्टुप् ॥

७ । ६७ । १ 'पुनर्मैत्विन्द्रियम्' इत्यात्म †दैवतं पुरः परोष्णिग्बृहतीति ॥ ८ ॥

७ । ६८ । ‡१ 'सरस्वति व्रतेषु' इति द्व्यृचम् ॥

---

* सब मूल पुस्तकों में पाठ 'रम्यां गृहान्' है 'रम्यान् गृहान्' हमनें दिया है ॥

† वी. देवत्यम् ॥

‡ पंचपटालिका में इस सूक्त को तृच माना है और अगले ६९ सूक्त को एकर्च स्वीकार किया है । परञ्च अनुक्रमणी तो ६८

७।६८। *३ 'शिवा नः' इति सारस्वते उभे ।७।६९।१ 'शं नः' इति सुखदेवताकं शंतातिः पूर्वस्य पूर्वानुष्टुप्, परात्रिष्टुप्। ६८। २ 'शिवा नः' इति गायत्री। ६९। १ 'शं नो वातः' इति पथ्यापंक्तिः ॥

७। ७०। १ 'यत् किं चासौ' इति पञ्चर्चमथर्वा मंत्रोक्त देवत्यमुत श्येनदेवताकं त्रैष्टुभम्। २ 'यातुधाना' इत्यतिजगती-गर्भा जगती। ३ 'अजिराधिराजौ' इति तिस्रोऽनुष्टुभः पूर्वा पुरः-ककुम्मती ॥

७। ७१। १ 'परि त्वाग्ने' इत्याग्नेयमानुष्टुभम् ॥

७। ७२। †१ 'उत तिष्ठत' इत्यैन्द्रं द्वयृचं प्रथमानुष्टुप्, द्वितीया त्रिष्टुप्। ‡३ 'श्रान्तं मन्ये' इत्यैन्द्रंत्रैष्टुभम् ॥

और ६९ इन दोनों सूक्तों को द्वयृच ही मानती है। शं. पा. के. सायण भाष्य के विना अन्य सब प्रकाशित संहिताओं नें ऋचाक्रम पटलिका के आधार से लिखा है। कौशिक सूत्र में तथा वैतान सूत्र में भी ६८ सूक्त को दो ऋचा वाला ही माना है ॥

* प्रकाशित संहिता में यह मंत्र ७। ६८। ३ है, अनुक्रमणी के मत में ७। ६९। १ का प्रथम मंत्र है ॥

† पटलिका में इस ७२ सूक्त को तृच माना है, परन्तु अनुक्रमणी इसे द्वयृच स्वीकार करके 'श्रान्तं मन्ये' वाले मंत्र का भिन्न एकर्च सूक्त स्वीकार करती है। कौशिक सूत्र में इसे इति तिस्रः कहकर तृच माना है ॥

७ । ७३ । *१'समिद्धो अग्निर्वृषणा' इत्येकादशर्चं घर्मसूक्तमाश्विनमुत प्रत्यृचं मंत्रोक्तदेवतंत्रैष्टुभमनेनघर्ममिमीति । पूर्वा, ४'यदुस्रियासु', ६'उप द्रव पयसा' इति जगत्यः । २'समिद्धो अग्निरश्विना' इति पथ्याबृहतीति† ॥ ६ ॥

७ । ७४ । १'अपचितां लोहिनीनाम्' इति चतुर्ऋचमथर्वांगिरा मंत्रोक्तदेवत्यमुतजातवेदसमानुष्टुभम् ॥

७ । ७५ । ‡१'प्रजावतीः' इति द्व्यृचमुपरिबभ्रव आघ्न्यं त्रैष्टुभम् । २'पदज्ञा' इति त्र्यवसाना §पंचपदा भुरिक्पथ्यापंक्तिरनेनाघ्न्यास्तुतिः ॥

७ । ७६ । ‖१'आ सुस्रसः' इति चतुर्ऋचमथर्वापचिद्भैषज्यदेवत्यमानुष्टुभमाद्या विराट् । २'या ग्रैव्या' इति परोष्णिक् ॥

---

* ७ । ७३ । ७, ८ ऋ० १ । १६४ । २६, २७ में स्वल्प भेद से हैं वहां ऋषि दीर्घतमा । ७३ । ६ ऋ० ५ । ४ । ५ यहां ऋषि वसुश्रुत आत्रेय है । ७३ । १० ऋ० ५ । २८ । ३ में है । वहां ऋषि 'विश्ववारात्रेयी' है । ७३ । ११ ऋ० १ । १६४ । ४० में है । वहां ऋषि दीर्घतमा है ॥

† वी. के विना 'इति' अन्य मूल लेखों में नहीं ॥

‡ ७ । ७५ । १ ऋ० ६ । २८ । ७ में स्वल्प भेद से आया है वहां ऋषि 'भरद्वाजो वार्हस्पत्यः' है ॥

§ क. ग. में पंचपदा नहीं ॥

‖ यहां यह चतुर्ऋच है । पटलिका में इसे कहीं भी चतुर्ऋचों में नहीं गिना । प्रकाशित मूल संहिताओं में यह सूक्त षड्ऋच है ।

७ । ७६ ।*५ 'विद्म वै' इति द्व्यृचं जायान्यै†न्द्र ‡दैवतं त्रैष्टुभम् । §पूर्वा भुरिगनुष्टुप् ॥

७ । ७७ ।‖१ 'सांतपना इदम्' इति तृचमंगिरा मंत्रोक्तमरुद्देवताकम् । पूर्वा त्रिपाद्गायत्री । २ 'यो नः' इति त्रिष्टुप् । ३ 'संवत्सरीणाम्' इति जगती ॥

७ । ७८ । १ 'वि ते मुञ्चामि' इति द्व्यृचमाग्नेयमथर्वा प्रथमा परोष्णिक्, परा त्रिष्टुबित्यनेनाग्निं प्रार्थयतीति¶ ॥ १० ॥

७ । ७६ । १ 'यत् ते देवा' इति चतुर्ऋचमथर्वामावास्या देवताकं त्रैष्टुभम् । प्रथमा जगत्यनेन मंत्रोक्तां देवतामिति ॥

प्रकाशकों ने पटलिका के आधार से ही ऐसा किया प्रतीत होता है । पटलिका में षड्ऋचों के गण में इसे नहीं गिना, क्योंकि द्वितीय पटलान्त में इसे फिर उद्धृत करना था । ७ । ७६ । ६ ऋ० ६।४७।६ में आया है । वहां ऋषि गर्ग है ॥

* पटलिका में यह सूक्त भिन्न नहीं, अनुक्रमणी में यह भिन्न द्व्यृच सूक्त माना है ॥

† सा० भा० भूमिका के पृ० १८ पर शं० पा० नें यहां पाठ जायन्यः । ऐन्द्र देवतम् , दिया है ॥

‡ बी. देवत्यं है ॥

§ शं० पा० भूमि० पृ० १८ में यह पाठ नहीं है ॥

‖ ७ । ७७ । १ ऋ० ७ । ५६ । ६, १० में स्वल्प भेद से आता है ॥

¶ क. ग. ङ. 'इति' नहीं ।

७ । ८० । १‘पूर्णा पश्चात्’ इति चतुर्ऋचं पौर्णमासम् । *३‘प्रजापते न’ इति प्राजापत्यं त्रैष्टुभम् । २‘वृषभं वाजिनम्’ इत्यनुष्टुबनेन मंत्रोक्तां देवतां चेति ॥

७ । ८१ । †१‘पूर्वापरम्’ इति षड्ृचंसावित्रीसूर्य्यचान्द्रमसं त्रैष्टुभम् । ३‘सोमस्यांशः’ इत्यानुष्टुभम् । ४‘दर्शोसि’ इति द्वे आस्तारपंक्ती । द्वितीया सम्राडनेन मंत्रोक्तं चन्द्रमसं देवमभिष्टूया-प्रार्थयतीति ॥ ११ ॥

७ । ८२ । ‡१‘अभ्यर्चत’ इति षड्ृचं संपत्कामः शौनक-आग्नेयं त्रैष्टुभम् । २‘मय्यग्रे’ इति ककुम्मतीबृहती । ३‘इहैव’ इति जगतीमंत्रोक्तां देवतामभ्यस्तौत् ॥

७ । ८३ । १‘अप्सु ते राजन्’ इति चतुर्ऋचं शुनः शेपो-वारुणमानुष्टुभम् । २‘धाम्नो धाम्नः’ इति पथ्यापंक्तिः । §३‘उदु-त्तमम्’ इति द्वे त्रिष्टुभौ । तत्र द्वितीया बृहतीगर्भा ॥

---

* ७ । ८० । ३ ऋ० १० । १२१ । १० में आया है । ऋषि ‘हिरण्यगर्भः प्राजापत्यः’ है ॥

† ७ । ८१ । १, २ ऋ० १० । ८५ । १८, १९ में आये हैं । ऋषि सूर्य्या सावित्री है ॥

‡ ७ । ८२ । १ ऋ० ४ । ५८ । १० में स्वल्प भेद से है, ऋषि वामदेव है ॥

§ ७ । ८३ । ३ ऋ० १ । २४ । १५ में आया है । ‘शुनः शेप आजीगर्तिः कृत्रिमो वैश्वामित्रो देवरात ऋषिः । ७ । ८३ । ४ पूर्व अथर्व ६ । १२१ । १ में भी आया है ॥

७ । ८४ । *१'अनाधृष्यो जातवेदाः' इति तृचं भृगुरैन्द्रं त्रैष्टुभम् । प्रथमाग्नेयी जगतीति ॥

७ । ८५ । १'त्यमू षु' इति तार्क्ष्यदेवत्यं त्रैष्टुभम् ॥

७ । ८६ । †१'त्रातारमिन्द्रम्' इत्यैन्द्रं त्रैष्टुभमुभे स्वस्त्ययनकामोऽथर्वा ॥

७ । ८७ । १'यो अग्नौ रुद्रः' इत्यथर्वा रौद्रं जागतम् ॥

७ । ८८ । १'अपेहि' इति तक्षकदेवत्यं गरुत्मान् त्र्यवसाना बृहतीति ॥

७ । ८९ । १'अपो दिव्या' इति चतुर्ऋचमाग्नेयमानुष्टुभं सिन्धुद्वीपः । ४'एधोसि' इति त्रिपान्निचृत्परोष्णिक् ॥

७ । ९० । ‡१'अपि वृश्च' इति तृचमंगिरा मंत्रोक्तदेवत्यमाद्या गायत्री । २'वयं तत्' इति विराट् पुरस्ताद्बृहती । ३'यथा शेपः' इति त्र्यवसाना षट्पदा भुरिग्जगतीति ॥ १२ ॥

७ । ९१ । §१'इन्द्रः सुत्रामा' इत्यथर्वा चान्द्रमसं त्रैष्टुभम्॥

---

* ७ । ८४ । २ ऋ० १० । १८० । ३, २ में है ऋषि 'जयः' है॥

† ७ । ८६ । १ ऋ० ६ । ४७ । ११ में है गर्ग ऋषि ॥

‡ ७ । ९० । १, २ । ऋ० ८ । ४० । ६ में आये हैं ॥

§ ७ । ९१ । १ ऋ० १० । १३१ । ६ में ऋषि सुकीर्त्तिः काक्षीवत है ॥

७ । ६२ । *१ 'स सुत्रामा' इति च प्रागुक्तर्षि छन्दोदेवत्यम् ॥

७ । ६३ । १ 'इन्द्रेण मन्युना' इति भृग्वंगिरा ऐन्द्रं गायत्रम् ॥

७ । ६४ ।†१ 'ध्रुवं ध्रुवेण' इत्यथर्वा सौम्यमानुष्टुभम् ॥

७ । ६५ । १ 'उदस्यश्यावौ' इति तृचम् ॥

७ । ६६ । १ 'असदन् गाव' इति ‡प्रागुक्तमुभे कपिजलः पूर्वं मंत्रोक्त गृध्रदेवत्यमुत्तरं वायसमुभे आनुष्टुभे । ६५ । २ 'अहमेनौ' इति द्वे भुरिजौ ॥

७ । ६७ ।§१ 'यदद्य त्वा' इति सूक्तमष्टर्चमथर्वा मंत्रोक्तैन्द्राग्नं त्रैष्टुभमनेन यज्ञ सम्पूर्णकामो यज्ञे पतिमिष्ट्वाप्रार्थयत् । ५ 'यज्ञ यज्ञम्' इति त्रिपदार्षी भुरिग्गायत्री । ६ 'एष ते यज्ञः' इति त्रिपात्प्राजापत्याबृहती । ७ 'वषड्ढुतेभ्यः' इति त्रिपदा साम्नीभुरिग्जगती । ८ 'मनसस्पते' इत्युपरिष्टाद्बृहती ॥

७ । ६८ । १ 'सं बर्हिः' इति ॥

---

* ७ । ६२ । १ ऋ० ६ । ४७ । १३ तथा १० । १३१ । ७ में आया है ऋषि दोनों स्थलों में वत् है ॥

† ७ । ६४ । १ ऋ० १० । १७३ । ६ में है ऋषि ध्रुवः है ॥

‡ ह्वि० ने 'प्राकृतम्' कल्पित किया है ॥

§ ७ । ६७ । २ ऋ० ५ । ४२ । ४ में अल्पभेद से आया है ऋषि अत्रि है ॥

७ । ६६ । १'परि स्तृणीहि' इति द्वे मंत्रोक्त दैवते त्रैष्टुभे । पूर्वा विराडुत्तरा भुरिक् ॥

७ । १०० । १'पर्यावर्ते दुष्वप्न्यात्' इति द्वे यमो दुःस्वप्ननाशनदेवत्ये आनुष्टुभे ॥

७ । १०२ । १'नमस्कृत्य' इति प्रजापतिर्मंत्रोक्तं नानादेवत्यं विराट्पुरस्ताद्बृहतीति ॥ १३ ॥

७ । १०३ । १'को अस्या नः' ॥

७ । १०४ । १'कः पृश्निम्' इति द्वे ब्रह्मात्मदैवते त्रैष्टुभे।

७ । १०५ । १'अपक्रामन्' इत्यथर्वा मंत्रोक्तदेवत्यमानुष्टुभम्।

७ । १०६ । १'यदस्मृति' इति मंत्रोक्तदैवतमुतजातवेदसं पराद्धं वारुणं बृहतीगर्भा त्रिष्टुप् ॥

७ । १०७ । १'अव दिवः' इति भृगुःसौर्य्यमुताब्दैवतमानुष्टुभम् ॥

७ । १०८ । १'यो नस्तायत्' इति द्वयृचमाग्नेयं त्रैष्टुभम् । पूर्वा बृहतीगर्भेति ॥

७ । १०९ । १'इदमुग्राय' इति सप्तर्चं वादरायणिराग्नेयंमुत मंत्रोक्तदेवत्यमानुष्टुभं । १'इदमुग्राय' इति विराट्पुरस्ताद्बृहती ।

२'घृतमप्सराभ्यः, ३'अप्सरसः, ५'यो नो द्युवे, ६'सं वसवः' इति त्रिष्टुभः ॥

७ । ११० । १'अग्न इन्द्रः' इति तृचं भृगुरैन्द्राग्नम् । पूर्वा गायत्री । २'याभ्यामजयन्' इति त्रिष्टुप् । ३'उप त्वा देवः' इत्यनुष्टुप् ॥

७ । १११ । १'इन्द्रस्य कुक्षिरसि' इति ब्रह्मा वार्षभं पराबृहतीत्रिष्टुप् ॥

७ । ११२ । *१'शुम्भनी' इति द्व्यृचं मंत्रोक्तमाब्दैवतम् । वरुणमानुष्टुभम् । पूर्वा भुरि†गिति ॥ १४ ॥

७ । ११३ । १'तृष्टके' इति द्व्यृचं भार्गवः । तृष्टिका देवत्यमाद्याविराडनुष्टुप् । परा शङ्कुमती चतुष्पदा भुरिगुष्णिक् ॥

७ । ११४ । १'आ ते ददे' इति द्व्यृचमग्नीषोमीयमानुष्टुभम् ॥

७ । ११५ । १'प्र पतेतः' इति चतुर्ऋचमथर्वाङ्गिरा सावित्रं जातवेदसमानुष्टुभमनेन पापामन्यायागतां लक्ष्मीं निन्दयित्वा, न्यायागतां पुण्यामभिष्टूय मंत्रोक्तां देवतामप्रार्थयत् । २'या मा लक्ष्मीः' इति द्वे त्रैष्टुभौ ॥

* ७।११२।२ ऋ० १० । ९७ । १६ में है ऋषि 'भिषगाथर्वणः' है । देवता ओषधीः स्तुति है अथर्व ६ । ९६ । २ में भी यह मंत्र आया है ॥

† क. ग. ङ इति नहीं ।

७ । ११६ । *१'नमो रूराय' इति द्व्यृचं चान्द्रम†सम्। आद्या परोष्णिक्। २'यो अन्येद्युः' इत्येकावसाना द्विपदार्च्यनुष्टुप्॥

७ । ११७ । ‡१'आ मन्द्रैः' इत्यैन्द्रं, पथ्याबृहती ॥

७ । ११८ । १'मर्माणि ते' इति बहुदेवत्यमुतचान्द्रमसं त्रैष्टुभमिति ॥ १५ ॥

इति ब्रह्मवेदोक्त मंत्राणां बृहत्सर्वानुक्रमणिकायां पञ्चमः पटलः समाप्तः ॥

---

*७ । ११६ । १ ऋ० ३ । ४५ । १ में आया है, ऋषि विश्वामित्र है॥

† क. ग. चान्द्रमस्यम्॥

‡ ७ । ११७ । १ ऋ० ६ । ७५ । १८ में है, 'पायुर्भारद्वाज' है॥

*अथाष्टमं काण्डम् ।

†ॐ नमो ब्रह्मवेदाय । ॐ अथेयं प्राग्रापरमे‡त्यरंकृषतनुक्रमेणेत्यनुसंधत्ताभिधेयेनाविष्कृताथर्वमंत्रर्षिछन्दोदैवतानुक्रान्तिस्तां गुर्वनुज्ञातो योऽधीतेऽध्यापयति च, स मंत्रपाठफलं सम्यगश्नुते । तेन विनियुक्ता मंत्राश्च सवीर्या भवन्ति । देहान्ते ब्रह्मलोकमनुभूय किंचित्कालं तदान्विह द्विजोत्तमकुलेऽवतीर्य परम§तुलं सुखं भुङ्क्ते । यः पुनरेतां छद्मनादत्तेग्राहयति वा ततः पठति पाठयति च, स गतायुरिहाप्रतिष्ठो दण्डयश्च भवति । मृतोऽन्ध तामि‖स्रं, नीचैर्गमनं यावदक्षरं कालमनुभूयेमं पुनर्मृत्युलोकं प्राप्योलूकत्वमश्नुते । किंचित्कालं पुनर्मृतोऽपि तमेव नरकमनुभूयेमं पुनरिहावतीर्य द्विजकुले विद्याभ्यासवशाद्गुरुध्रुग् जन्मान्धोऽवश्यं भवतीति । निश्चितोऽभिभवेदिति यथोक्तप्रकाशस्यचोभयथा नूनमक्षय्यं सुकृतं भवेदिति ॥

अथ क्षुद्रकाण्डार्थसूक्तमंत्राणामृषिदैवतछन्दांस्युच्यन्ते । ततो यावदेकादश काण्डान्तमर्थसूक्तप्रकृतिस्तावद्विहाय पर्यायान्विराड्वाप्रभृतीनिति तत्र ॥

---

* यह लेख हमारा है ॥

† गु० श्री गणेशाय नमः । क. में यहां कुछ नहीं ॥

‡ ङ. 'अपरं कृषनु' ठीक पाठ पढ़ा नहीं जाता ॥

§ ङ 'कुलं' ॥

‖ क. ङ. 'तामिश्रं' ॥

८ । १ । १ 'अन्तकाय मृत्यवे' ॥

८ । २ । १ 'आरभस्व' इति द्वे ब्रह्मार्ष्यायुष्ये त्रैष्टुभे अपश्यदिति । सर्वत्रानुक्तेऽपि शेषोऽनुवर्तते । या यद्देवत्येति चाद्यस्याद्या पुरोबृहती त्रिष्टुप् ॥

८ । १ । २ 'उदेनम्' इति द्वे, १७ 'उत त्वा द्यौः' इति पञ्चानुष्टुभः । ४ 'उत कामातः पुरुष', ९ 'श्यामश्च* त्वा', १५ 'जीवेभ्यस्त्वा' इति द्वे प्रस्तारपंक्तयः । ७ 'मा ते मनः' इति त्रिपाद्विराड्गायत्री । ८ 'मा गतानाम्' इति विराट्पथ्याबृहती । १२ 'मा त्वा क्रव्यात्' इति त्र्यवसाना पञ्चपदा जगती । १३ 'बोधश्च त्वा' इति त्रिपाद्भुरिङ्महाबृहती । १८ 'ते त्वा रक्षन्तु' इत्येकावसाना द्विपदा साम्नी भुरिग्बृहती । इदमेकाविंशकमिहाद्यमुच्यत इति ॥ १ ॥

८।२। १ 'आ रभस्व' इति द्वे, ७ 'अधिब्रूहि' इति भुरिजः । ३ 'वातात्ते' इत्यास्तारपंक्तिः । ४ 'प्राणेन त्वा' इति प्रस्तारपंक्तिः । ६ 'जीवलां †नघा' इति पथ्यापंक्तिः । ८ 'अस्मै मृत्यो' इति पुरस्ताज्ज्योतिष्मती जगती । ९ 'देवानां हेतिः' इति पञ्चपदाजगती । ११ 'कृणोमि ते' इति विष्टारपंक्तिः । १२ 'आरादरातिम्' इति पुरस्ताद्बृहती । १४ 'शिवे ते स्ताम्' इति त्र्यव-

---

* बी. 'त्वा' नहीं ॥

† बी. 'नघारिषाम्निते' ॥

साना षट्पदा जगती । १५ 'शिवास्ते' इति पथ्यापंक्तिः । १९ 'यद-श्नासि' इत्युपरिष्टाद्बृहती । २१ 'शतं ते' इति सतःपंक्तिः । २२ 'शरदे त्वा', २८ 'अग्नेः शरीरम्' इति पुरस्ताद्बृहत्यौ । ५ 'अयं जीवतु', १० 'यत्ते नियानम्', १६ 'यत्ते वासः' इति तिस्रः, २० 'अन्हे च त्वा' इति, २३ 'मृत्युरीशे' इति तिस्रः, २७ 'ये मृत्यवः' इति चैता अनुष्टुभस्तत्र १७ 'यत् क्षुरेण' इति त्रिपादि-दमाद्यं विंशसहितमष्टर्चो परा इति ॥ २ ॥

८ । ३ । *१ रक्षोहणम् ॥

८ । ४ । †१ 'इन्द्रासोमा' इति द्वे ‡अनुवकौ चातनः । पूर्वं षड्विंशमाग्नेयमुत्तरं पञ्चविंशकं मंत्रोक्तदेवत्यम् । जागतमाद्यं त्रैष्टुभम् ॥

८ । ३ । §७ 'उतारब्धान्', १४ 'पराद्य देवाः' इति द्वे, ‖१७ संवत्सरीणां पयः', २१ 'तदग्ने', १२ 'यदग्ने' इति भुरिजः । ¶२५ 'ये ते शृङ्गे' इति पञ्चपदा बृहतीगर्भाजगती । २२ 'परि

---

* ८ । ३ । १ ऋ० १० । ८७ । १ में है, ऋषि पायुः है ॥

† ८ । ४ समग्रसूक्त ऋग्वेद ७ । १०४ सूक्त है वहां ऋषि वसिष्ठ है ॥

‡ क. अनुवाकौ, ङ. बी. अनुवाकं, घ० अनुवाव ॥

§ ८ । ३ । २४ ऋ० ५ । २ । ९ में है ऋषि कुमार अत्रेयो वंशो वा जार उभौ वा ॥

‖ ८ । ३ । १७ ऋ० १० । ८७ । १७ में है, ऋषि पायु है ॥

¶ ८ । ३ । २४ ऋ० ५ । २ । ९ में है ऋषि कुमार आत्रेयो वृशो वा जार उभौवा है ॥

त्वा अग्ने' इति द्वे अनुष्टुभौ । *२६'अग्नी रक्षांसि' इति गायत्री ॥

८ । ४ । ८'यो मा पाकेन' इति सप्त, १६'यो मायातुम्' इति द्वे, १६'प्र वर्तय दिवः', २२'उलूकयातुम्', २४'इन्द्र जहि' इति त्रिष्टुभः । २०'एत उ त्ये', २३'मा नो रक्ष' इति भुरिजौ । २५'प्रति चक्ष्व' इत्यनुष्टुबिति† ॥ ३ ॥

८ । ५ । १'अयं प्रतिसरः' इति द्वाविंशं शुक्रः कृत्यादूषण देवत्यमुत मंत्रोक्तदेवत्यमानुष्टुभमाद्योपरिष्टाद्बृहती । द्वितीया त्रिपाद्विराड्गायत्री । ३'अननेन्द्रः' इति चतुष्पाद्भुरिग्जगती । ५'तदग्निः' इति संस्तारपंक्तिः भुरिक् । ६ अन्तर्दधे' इत्युपरिष्टाद्बृहती । ७'ये स्राक्त्यम्' इति द्वे ककुम्मत्यौ । ६'याः कृत्याः' इति पुरस्कृतिर्जगती । १०'अस्मै मणिम्' इति त्रिष्टुप् । ११'उत्तमो असि' इति पथ्यापंक्तिः । १४'कश्यपस्त्वा' इति ञ्यवसाना षट्पदा जगती । १५'यस्त्वा कृत्याभिः' इति पुरस्ताद्बृहती । १६'एन्द्राग्नं वर्म' इति जगतीगर्भा त्रिष्टुप् । २०'आमा रुक्षत्'इति विराड्गर्भा‡स्तारपंक्तिः । २१'अस्मिान्निन्द्रः'इति परा विराट्त्रिष्टुप् । २२'स्वस्तिदा विशाम्' इति ञ्यवसाना सप्तपदा विराड्गर्भा भुरिक् शक्करी§ति ॥ ४ ॥

---

* ८ । ३ । २६ ऋ० ७ । १५ । १० में है, ऋषि वसिष्ठ है ॥

† क. ङ. इति नहीं ॥

‡ बी. प्रस्तार पंक्तिः । ह्विटने ने भी प्रस्तार पंक्तिः ही लिखा है परन्तु टिप्पणि में वार्लिन मूल लेख से उसने भी आस्तार पंक्तिः पाठ उचित माना है ॥

§ क. बी. में इति है ङ में नहीं ॥

८ । ६ । १ 'यां ते माता' इति षड्विंशं मातृनामा ऋषिर्मातृनामादेवत्यमुत मंत्रोक्तदेवत्यमानुष्टुभम् । ब्रह्मानेन गर्भरक्षणार्थश्चास्तौत् । २ 'पलालानुपलालौ' इति पुरस्ताद्बृहती । १० 'ये शालाः' इति त्र्यवसाना षट्पदाजगती । ११ 'ये कुकून्धाः' इति द्वे, १४ 'ये पूर्वे', १६ 'पर्यस्ताक्षाः' इति पथ्यापंक्तयः । १५ 'येषां पश्चात्' इति त्र्यवसाना सप्तपदा शक्करी ब्राह्मणस्पत्या । १७ 'उद्धर्षिणम्' इति तथा जगतीति ॥

८ । ७ । १ 'या बभ्रवः' इत्य*ष्टाविंशकमथर्वा भैषज्यायुष्यमुत मंत्रोक्तोषधिदेवताकमानुष्टुभम् । २ 'त्रायन्तामिमं' इत्युपरिष्टाद्भुरिग्बृहती । ३ 'आपो अग्रम्' इति पुरउष्णिक् । ४ 'प्रस्तृणती' इति पंचपदा परानुष्टुबतिजगती । ५ 'यद् वः सहः' इति द्वे पथ्यापंक्ती द्वितीया विराड्गर्भा भुरिक् । ६ 'अव कोल्वा' इति द्विपदार्चीभुरिगनुष्टुप् । १० 'उन्मुञ्चन्तीः' इति पथ्यापंक्तिः । १२ 'मधुमन्मूलम्' इति पंचपदा विराडतिशक्करी†ति ॥ ५ ॥

१४ 'वैयाघ्रो मणिः' इत्युपरिष्टान्निचृद्बृहती । २५ 'यावतीनामोषधीनाम्' इति पथ्यापंक्तिः । २६ 'यावतीषुमनुष्याः' इति निचृत् । २८ 'उत त्वाहार्षम्' इति भुरिक् ॥

८ । ८ । १ 'इन्द्रो मन्थतु' इति चतुर्विंशं भृग्वंगिरा ऐन्द्रमुतवानस्पत्यं परं सेनाहननमानुष्टुभम् । २ 'पूतिरज्जुः' इति द्वे

* बी. इति साष्टा विंशकम् ॥

† ङ. इति नहीं ॥

बृहत्यौ । पूर्वोपरिष्टद् द्वितीया विराट् । ४ 'पुरुषानमून्' इति बृहतीपुरस्तात् प्रस्तारपंक्तिः । ६ 'बृहद्धि जालम्' इत्यास्तारपंक्तिः । ७ 'बृहत् ते' इति विपरीतपादलक्ष्मा चतुष्पदाति जगतीति । ८ 'अयं लोकः' इति तिस्र उपरिष्टाद्बृहत्यः । ११ 'नयतामून्' इति पथ्याबृहती । परा भुरिक् । १६ 'परा जिताः' इति द्वे पुरस्ताद्बृहत्यौ । पूर्वा विराडुत्तरानिचृत् । २१ 'सं क्रोशताम्' इति त्रिष्टुप् । २२ 'दिशश्चतस्रः' इति चतुष्पदा शक्करी । २३ 'संवत्सरो रथः' इत्युपरिष्टाद्बृहती । २४ 'इतो जयेतः' इति त्र्यवसाना त्रिष्टुबुष्णिग्गर्भा परा शक्करी पञ्चपदा जगतीति* ॥ ६ ॥

८ । ६ । १ 'कुतस्तौ' इति षड्विंशमथर्वा काश्यपेयमुत सर्वार्षंछान्दसं त्रैष्टुभम् । २ 'यो अक्रन्दयत्' इति द्वे पंक्ती । द्वितीयास्तारपंक्तिः । ४ 'बृहतः परि' इति द्वे अनुष्टुभौ । ८ 'यां प्रच्युताम्' †इति, ११ 'इयमेव' इति जगत्यौ । ६ 'अप्राणैति' इति भुरिक् । १२ 'छन्दः पक्षे उषसा', २२ 'इत्थं श्रेयः' इति जगत्यौ । १४ 'अग्नीषोमावदधुः' इति चतुष्पदातिजगती । २३ 'अष्टेन्द्रस्य' २५ 'को नु गौः' इति द्वे अनुष्टुभ इति‡ ॥ ७ ॥

८ । १० । पर्य्याय १ ।

८ । १० । १ विराड्वा प्रभृतिर्वस्योभूयायां तांस्त्रयस्त्रिंशत्स-

* ङ. इति नहीं ॥

† ङ. इति नहीं ॥

‡ क. ङ. इति नहीं तथा अन्य लेखों में पाठ 'भाविति' है ॥

प्तशतं पर्यायमंत्रानथर्वाचार्योऽपश्यत् । *तत्र १ 'विराड्वा' इति षट् पर्याया विराड्देवत्यास्तत्राद्यं त्रयोदशकम् । प्रथमा त्रिपदार्ची-पंक्तिः । २ सोदक्रामत्' इति षड्याजुषीजगत्यः । ३ 'गृहमेधी', ६ यन्त्यस्यसभाम्' इति साम्न्यनुष्टुभौ । ५ 'यन्त्यस्य देवाः' आर्च्यनुष्टुप् । ७ 'यज्ञर्तो', १३ 'यन्त्यस्यामन्त्रणं', विराड्गायत्र्यौ । ११ 'यन्त्यस्य समितिम्' इति साम्नीबृहतीति ॥ ८ ॥

८ । १० । पर्य्याय २ ।

†१ 'सान्तरिक्षे' इति दशकमाद्या त्रिपदा ६ 'ओषधीरेवास्मै' इति साम्न्यनुष्टुभौ । २ 'तां देवमनुष्याः' उष्णिग्गर्भा चतुष्पदो-परिष्टाद्विराड्बृहती । ३ 'तामुप' इत्येकपदा याजुषीगायत्री । ४ 'ऊर्ज एहि', एकपदा, ७ 'ओषधीरेव' इति साम्नां‡पंक्ती । ५ तस्या इन्द्रः' विराड्गायत्री । ६ 'बृहच्चरथन्तरं च' आर्च्यनुष्टुप् । ८ 'अपो वामदेव्येन' आसुरी गायत्री । १० 'अपो वामदेव्यम्' साम्नांबृहतीति ॥ ६ ॥

---

* शंकरपाण्डुरङ्ग नें भी सर्वानुक्रमणिका के आधार से सायण भाष्य में इस काण्ड के १५ सूक्त वनाये हैं परन्तु औरों ने इसके सूक्त १० स्वीकार करके शेषों को पर्य्याय रूप से इसके अन्तर्गत ही दिया है । हमनें भी पर्य्याय सूक्तान्तर्गत ही रक्खा है ॥

† इस प्रकार का प्रतीकोद्धरण क्रम अथर्व में जो है वह विस्तार रूप से पंचपटलिका १ । १ में देखो ॥

‡ शं. पा० ने सायणभाष्य भू० पृ० १६ में पांक्तिः पाठ दिया है ॥

८ । १० । पर्य्याय ३ ।

१'सा वनस्पतीन्' इत्यष्टौ । प्रथमा चतुष्पदा विराडनुष्टुप् । २'तस्माद् वनस्पतीनाम्' आर्चीत्रिष्टुप् । ३'सा पितॄन्' इति तिस्रः चतुष्पादः प्राजापत्याः पंक्तयः । ४'तस्मात् पितृभ्यः', ६'देवेभ्यः', ८'मनुष्येभ्यः' इति तिस्र आर्चीबृहत्यः ॥

८ । १० । प० ४ ।

*१'सासुरान्' इति द्वे षोडशके । तत्राद्या ५'सापितॄन्' । ५ । १'सा देवान्', ५ । १३'सा सर्पान्' इति चतुष्पादः साम्नां-जगत्यः । २ तस्या विरोचनाः', ६ यमः', १०'मनुः', ५ । १०'कुवेरः', ५ । १४ 'तक्षकः' इति साम्नां बृहत्यः । ५ । १'तां देवाः', ३'तां द्विमूर्धा' इति साम्न्युष्णिहौ । ४'तां मायाम्', ८ स्वधाम्', ५ । ४'ऊर्जाम्', ५ । १६'तद्विषम्' इत्यार्च्यनु†ष्टुभः । ७'तामन्तकः' आसुरी गायत्री । ६'सा मनुष्यान्'. १३'सा सप्त-र्षीन्', ५ । ६'सेतरजनान्' इति चतुष्पाद उष्णिहः । ११ तां पृथी' प्राजापत्यानुष्टुप् । १२ ते कृषिं', १६'तद् ब्रह्म' ५ । ८'तं पुण्यम्' इत्यार्ची त्रिष्टुभः । १४'तस्याः सोमः ,५।२'इन्द्रः' इति साम्न्युष्णिहौ । १५'तां बृहस्पतिः' ५ । ७'वसुरुचिः' ५ । ११'रजतनाभिः' इति विराड्गायत्र्यः ॥ १० ॥

---

* इस में ४ तथा ५ पर्य्यायों के उदाहरण हैं । ४ के उदाहरणों में केवल मंत्र संख्या चिन्ह ही दे दिया है । और पञ्चम का (५) अंक देकर मंत्र संख्या दी है ॥

† ङ. बी. अनुष्टुप् ॥

८। १० । प० ५ ।

५'सा गन्धर्वाप्सरसः' इति चतुष्पदा प्राजापत्या जगती । ६'तस्याश्चित्र रथः' साम्नां बृहती त्रिष्टुप् । १२'तां विरोधाम्' त्रिपदा ब्राह्मीभुरिग्गायत्री । १५'तां धृतराष्ट्रः' साम्न्यनुष्टुबिति ।

८। १० । प० ६ ।

*१'तद् यस्मा' इति चतुष्कमाद्याविराड्गायत्री । २'न च' इति साम्नां त्रिष्टुप् । ३ यत् प्रत्याहन्ति' इति प्राजापत्यानुष्टुप् । ४'तां विषमेव' इत्याच्र्युष्णिक् । इहानुक्तपादा द्विपदा इति ॥ ११ ॥

* क. में यह पर्य्याय छूट गया है ॥

*अथ नवमं काण्डम् ।

९ । १ । १ 'दिवस्पृथिव्याः' इति चतुर्विंशर्चमथर्वा । मधुदेवत्यमाश्विनं त्रैष्टुभम् । द्वितीया त्रिष्टुब्गर्भापंक्तिः । ३ 'पश्यन्त्यस्याः' इति परानुष्टुप् । ६ 'कस्तं', ७ 'स तौ' इति यवमध्ये महाबृहत्यौ । पूर्वातिशाक्वरगर्भोत्तरातिजागतगर्भा । ८ 'हिङ्करिक्रती' इति बृहतीगर्भा संस्तारपंक्तिः । १० 'स्तनयित्नुस्ते' इति परोष्णिक्पंक्तिः । ११ 'यथा सोमः प्रातः सवने' इति तिस्रः, †१५ 'सं माग्ने' इति द्वे, १८ 'यद्गिरिषु' इति द्वे अनुष्टुभः । १४ 'मधु जनिषीय' इति पुर उष्णिक् । १७ 'यथा मक्षा' इत्युपरिष्टाद्विराड्बृहती । २० 'स्तनयित्नुस्ते' इति भुरिग्विष्टारपंक्तिः । २१ 'पृथिवी दण्डः' इत्येकावसाना द्विपदार्च्यनुष्टुप् । २२ 'यां वै कशायाः' इति त्रिपदा ब्राह्मी पुरउष्णिक् । २३ 'मधुमान् भवति' इति द्विपदार्चीपंक्तिः । २४ 'यद् वीध्रे' इति त्र्यवसाना षट्पदाष्टिरिति ॥ १२ ॥

९ । २ । १ 'सपत्न हनम्' इति पंचविंशकं कामदेवत्यं त्रैष्टुभम् । ५ 'सा ते काम' इत्यतिजगती । ७ 'अध्यक्षः' इति जगती ।

---

* यह लेख हमारा है ।

† ९ । १ । १५ ऋ० १ । २३ । २४ में है, ऋषि 'मेधातिथि काण्व' है ॥

८'इदमाज्यम्' इति *त्रिपदार्चीपंक्तिः। ११'अवधीत् कामः' इति भुरिक्। †१२'ते धराश्चः' इत्यनुष्टुप्। १३ अग्निर्यवः' इति द्विपदार्च्यनुष्टुप्। १४'असर्ववीरः' इति द्वे, १७ येन देवाः इति द्वे, २१'यावतीर्दिशः' इति द्वे जगत्यः। २०'यावतीद्यावापृथिवी', २३'ज्यायान्' इति भुरिजौ। १६'यत् ते काम' इति चतुष्पदा शक्करीगर्भा परा जगतीति ॥ १३ ॥

६। ३। १'उपमिताम्' इति चैकत्रिंशत्कं, भृग्वंगिराः शाला देवत्यमानुष्टुभम्। ६'यानि ते' इति पथ्यापंक्तिः। ७'हविर्धानम्' इति परोष्णिक्। १५'अन्तरा द्याम्' इति त्र्यवसाना पञ्चपदातिशक्करी। १७'तृणैरावृता' इति प्रस्तारपंक्तिः। २१'या द्विपक्षा' इत्यास्तारपंक्तिः। २५'प्राच्या दिशः' ‡३१'दिशोदिशः' इति त्रिपादौ प्राजापत्या बृहत्यौ। २६'दक्षिणाया दिशः' इति साम्नां त्रिष्टुप्। २७'प्रतीच्याः',२८'उदीच्याः' २९'ध्रुवायाः',३०'ऊर्ध्वायाः', प्रतिष्ठा नाम गायत्र्यस्त्रिपाद एताः सप्तैकावसाना इति ॥ १४ ॥

६। ४। १'साहस्रस्त्वेषः' इति चतुर्विंशकं ब्रह्मार्षभं त्रैष्टुभम्। ८'इन्द्रस्यौजः' इति भुरिक्। ६'सोमेन पूर्णम्', १०'बृहस्पतिः सविता' इति जगत्यौ। ११'य इन्द्र §इव' इति

---

* ह्वि० द्विपदा लिखा है॥

† ६। २। १२ अथर्व ३। ६। ७ में आचुका है॥

‡ बी. यहां कुछ पाठ छूटा हुआ है॥

§ बी. इव देवेष्विति॥

सप्त, १६'ब्राह्मणेभ्य ऋषभम्' इति द्वे, *२३'उपेहोपपर्चन' इत्यनुष्टुभः । १८'शत याजम्' इत्युपरिष्टाद्बृहती । २१'अयं पिप्रानः' इत्यास्तारपंक्तिः । २४ एतं वो युवानम्' इति जगती ॥

६ । ५ । १'आ नय' इत्यष्टात्रिंशद्भृगुर्मन्त्रोक्ताजं पंचौदनदेवत्यं त्रैष्टुभम् । ३'प्रपदः' इति चतुष्पात्पुरोऽतिशक्वरी जगती । ४'अनु च्छ्य श्यामेन', १०'अजस्त्रिनाके' इति जगत्याविति ॥१५

६ । ५ । १४'अमोतम्', १७'येनासहस्रम्', २७'या पूर्वम्' इति †तिस्रोऽनुष्टुभः । ३०'आत्मानं पितरम्' इति ककुम्मती । २३'नास्यास्थीनि' इति पुर उष्णिक् । १६'अजोसि' इति त्रिपादनुष्टुप् । १८'अजः पक्वः' इति §त्रिपाद्विराड्गायत्री । २४'इदमिदमेव' इति पञ्चपदानुष्टुबुष्णिग्गर्भोपरिष्टाद्बार्हता विराड्जगती । २०'अजो वा इदमग्रे' इति तिस्रः, २६'पञ्च रुक्म' इति पञ्चपदानुष्टुबुष्णिगर्भोपरिष्टाद्बार्हता भुरिजः‖ । ३१'यो वै नैदाघम्' इति सप्तपदाष्टिः । ३२'यो वै कुर्वन्तम्' इति चतस्रो दशपदाः प्रकृतयः । ३६'यो वा अभिभुवम्' इति दशपदाकृतिः ।

---

* ६ । ४ । २३ ऋ० ६ । २८ । ८ में बहु पाठ भेद से है ॥

† ङ. इति नहीं ॥

‡ गु० के विना अन्य क. ङ. वो. लेखों में चतस्रः ही पाठ है । गु० का पाठ शुद्ध है क्योंकि १४, १७, २७ में तीन ऋचायें हैं जिनका अनुष्टुप् छन्द है चार ऋचायें नहीं ॥

§ वी. में विराड् पद छूटा है ॥

‖ सब मूल लेखों में पाठ 'भुरिक्' है ॥

३७'अजं च पचत' इति त्रिपाद्विराड्गायत्री। ३८'तास्ते रक्षन्तु' इत्येकावसाना द्विपदा साम्नांत्रिष्टुबिति ॥ १६ ॥

६ । ६ । प० १ ।

६ । ६ । १'यो विद्यात्' इति षट् पर्य्याया ब्रह्मातिथ्या उत विद्या देवत्यास्तत्र १'यो विद्यात्' *सप्तदश पूर्वाद्या नागीनामत्रिपाद्गायत्री । २'सामानि यस्य' त्रिपदार्षीगायत्री । ३'यद् वा अतिथिपतिः' ७'यदावसथान्' साम्नी त्रिष्टुभौ । ४'यदभिवदति', ६'यदुपरिशयनम्' आर्च्यनुष्टुभौ । ५'या एव यज्ञ', आसुरी गायत्री । ६'यत् तर्पणं' त्रिपदा साम्नां जगती। ८'यदुपस्तृणन्ति' याजुषीत्रिष्टुप् । १०'यत् कशिपूपबर्हणम्' साम्नांभुरिग्बृहती। ११'यदाञ्जनाभ्यञ्जनम्',१४'ये व्रीहयः' इति तिस्रः साम्न्यनुष्टुभः । १२'यत् पुरा' इति विराड्गायत्री । १३'यदशन कृतम्' साम्नीनिचृत्पंक्तिः । १७'स्रुग्दर्विः' त्रिपाद्विराड्भुरिग्गायत्रीति† ॥ १७ ॥

६ । ६ । प० २ ।

१'यजमान ब्राह्मणं वा' इति त्रयोदश । प्रथमा विराट्पुरस्ताद्बृहती । २'यदा ह भूयः', १२'प्रजापतेर्वा एष' साम्नां-

---

* यहां पाठ में परस्पर बहुत भेद है। क. "दश सप्तर्चाद्या नागीनामा"। ङ. में पाठ ऊपर के मूलवत् है, किन्तु नाम के पूर्व 'नागी' पद छूटा हुआ है। हमनें मूल में बी. का पाठ दिया है॥

† ङ. इति नहीं॥

त्रिष्टुभौ । ३'उप हरति' आसुर्यनुष्टुप् । ४'तेषामासन्नानां' साम्न्युष्णिक् । ५'स्रुचा हस्तेन', ११'प्राजापत्यो वा' इति साम्नां बृहत्यौ । द्वितीया भुरिक् । ६'एते वै प्रियाः' आर्च्यनुष्टुप् । *७'स य एवम्' इति त्रिपात्स्वराडनुष्टुप् । ९'सर्वो वा एषो जग्धपाप्मा' साम्न्यनुष्टुप् । १०'सर्वदा वा एष' त्रिपदार्चीत्रिष्टुप् । १३'योऽतिथीनाम्' त्रिपदार्चीपंक्तिरिति ॥ १८ ॥

९ । ६ । प० ३ ।

१'इष्टं च वा' इति नवकं प्रथमाः षट्, ९'एतद् वा उ स्वादीयः' इति त्रिपादः पिपीलिकमध्या गायत्र्यः । ७'एष वा अतिथिः' साम्नी बृहती । ८'आशितावती' इति पिपीलिकमध्योष्णिक् ॥

९ । ६ । प० ४ । १'स य एवम्',

९ । ६ । प० ५ । १'तस्मा उषा' इति द्वौ दशकौ ॥

६ । ४ प० । पूर्वस्याद्याश्चतस्रः १'स य एवम्' इति शङ्करूपाः प्राजापत्या अनुष्टुभः । ९'स य एवं विद्वानुदकम्' इति भुरिक् । २'यावदग्निष्टोमेन' इति चतस्रो †यावत्सर्वरूपास्त्रिपादो-

---

* क. ङ. में "स य एवं विद्वानिति पंचपदा विराट् पुरस्ताद्बृहती" पाठ है। इनका पाठ बी. से सर्वथा भिन्न है। ह्वि० ने भी मूलवत् पाठ ऊपर देकर टिप्पणे में बर्लिनसंस्करण का पाठ दिया है॥

† शं. पा. यावच्छन्दरूपा। क. यावच्छत्ररूपा बी. पाठ पढ़ा नहीं जाता। हमने ङ. का पाठ दिया है॥

गायत्र्यः । १०'प्रजानां प्रजननाय' इति चतुष्पात्प्रस्तारपंक्तिः ॥

६ । ५ । उत्तरस्याद्या साम्न्युष्णिक् । २'बृहस्पतिरुर्जय' इति पुर उष्णिक् । ३'निधनंभूत्याः' साम्नां भुरिग्बृहती । ४'तस्मा उद्यन्', ६'अभ्रः' ६'उपहरति' इति साम्न्यनुष्टुभः । ५'मध्यंदिन' त्रिपदा निचृद्विषमा नाम गायत्री । ७'विद्योतमानः' त्रिपदा विराड्विषमा नाम गायत्री । ८'अतिथीन् प्रति' इति त्रिपाद्विराडनुष्टुबिति ॥ १९ ॥

६ । ६ । प० ६ ।

१'यत् क्षत्तारम्' इति चतुर्दशकं पूर्वासुरीगायत्री । २'यत् प्रतिशृणोति' साम्न्यनुष्टुप् । ३'यत् परिवेष्टारः', ५'यद् वा अतिथिपतिः' *त्रिपदे आर्चीपंक्ती । ४'तेषां न' इत्येकपदा प्राजापत्या गायत्री । ६'यत् सभागयति' इति षडार्च्यो बृहत्यः । १२'स उपहूतः' एकपदासुरी जगती । १३'आप्नोतीमम्' याजुषी त्रिष्टुप् । १४'ज्योतिष्मतः' एकपदासुर्युष्णिक् ॥

६ । ७ । १'प्रजापतिश्चै†कः' षड्विंशो गव्यः । आद्यार्चीबृहती । २'सोमो राजा' आर्च्युष्णिक् । ३'विद्युज्जिह्वा', ५'श्येनः क्रोडः' आर्च्यनुष्टुभौ । ४'विश्वं वायुः', १४'नदी सूत्री', १५'विश्व-

---

* ड. बी. त्रिपदा आर्ची ॥

† अथर्व संहिता में पाठ 'प्रजापतिः' मात्र है उसके आगे 'चैकः' नहीं परन्तु समग्र मूल लेखों में प्रजापतिश्चैकः है अतः यह पाठ विचारणीय है ॥

व्यचाः, १६'देवजना' इति साम्नां बृहत्यः। ६'देवानां पत्नीः' ८'इन्द्राणी' आसुरी गायत्र्यौ। ७'मित्रश्च' त्रिपदा पिपीलिकमध्यानिचृद्गायत्री। ६ ब्रह्म च', १३'क्रोधो वृक्कौ' साम्नां गायत्राविति* ॥ २० ॥

१०'धाता च' इति पुर उष्णिक्। ११'चेतो हृदयम्', १२'क्षुत्कुक्षिः', १७'रक्षांसि लोहितम्', २५'एतद्वै' इति साम्न्युष्णिहः। १८'अन्नं पीवः', २२'तृणानि प्राप्तः' एकपदे आसुरीजगत्यौ। १६'अग्निरासीनः' एकपदासुरीपंक्तिः। २०'इन्द्रः प्राङ्तिष्ठन्' याजुषीजगती। २१'प्रत्यङ्तिष्ठन्' आसुर्यनुष्टुप्। २३'मित्र ईक्षमाणः' एकपदासुरी बृहती। २४'युज्यमानः' साम्नां भुरिग्बृहती। ३६'उपेनम्' साम्नीत्रिष्टुप्। इहानुक्तपादा द्विपदा इति ॥ २१ ॥

६। ८। १'शीर्षक्तिं शीर्षाम†यम्' इति द्वाविंशकम्। भृग्वंगिरा अनुष्टुबनेन सर्वशीर्षामयां ह्यामयमुपाकरोत्। १२ उदरात्ते' इत्यनुष्टुब्गर्भा ककुम्मती चतुष्पादुष्णिक्। १५'याः पार्श्वे' इति विराडनुष्टुप्। २१'पादाभ्यां ते' इति विराट्पथ्या बृहती। २२'सं ते शीर्ष्णः' इति पथ्यापंक्तिः ॥

६। ६। ‡१'अस्य वामस्य' इति द्वाविंशकं वामीयम्।

---

* क. ङ. इति नहीं ॥

† बी. सर्वशीर्षमिति। किसी मूल लेख से भी अर्थ बहुत स्फुट नहीं होता मूल पाठ घ के आधार से दिया है ॥

‡ ६। ६ सूक्त ऋ० १। १६४ सूक्त में आता है, ऋषि दीर्घतमा है ॥

ब्रह्मादित्यदेवत्यं त्रैष्टुभमध्यात्मकरम्। १२'पञ्चपादं', १४'सनेमि', १६'साकंजानां', १८ अवः परेण पितरम्' इति जगत्यः॥

६। १०। *१'यद् गायत्रे' इत्यष्टाविंशकम्। गोविराडध्यात्मदेवत्यं त्रैष्टुभम्। आद्या, ७'अयं स', १४'इयं वेदिः, १७'सप्तार्धगर्भा' इति द्वे जगत्यः। †२१'गौरिन्मिमाय' इति पञ्चपदाति शक्करी। तथा २३'अपादेति मैत्रावरुणौ, २४'विराड्वाग् इति चतुष्पदा पुरस्कृतिर्भुरिगतिजगती। २'गायत्रेणप्रति', २६'त्रयः केशिनः' इति द्वे भुरिज इति॥ २२॥

इति श्री ब्रह्मवेदोक्त मंत्राणां बृहत्सर्वानुक्रमणिकायां षष्ठः पटलः समाप्तः॥

* ६।१०।६,१६, २३ तथा २४ मंत्रों के विना शेष सब मंत्र इस सूक्त के ऋ० १। १६४ सूक्त में मिलते हैं, ऋषि दीर्घतमा है। इसका ६वां मंत्र ऋ० १०। ५५। ५ में है, ऋषि बृहदुकथः वामदेव्यः है। और मंत्र २३ ऋ० १। १५२। ३ में है ऋषि दीर्घतमा है॥

† क. ङ. 'मिमाय' नहीं॥

*अथ दशमं काण्डम् ।

१०।१।१ॐ 'यां कल्पयन्ति' द्वात्रिंशत् प्रत्यंगिरसः । कृत्या दूषणदैवत्यमानुष्टुभमाद्या महाबृहती । २'शीर्षण्वती' इति विराण्नाम गायत्री । ६'ये त्वा' इति पथ्यापंक्तिः । १२'देवैनसात्' इति पंक्तिः । १३'यथा वातः' इत्युरोबृहतीति । १५'अयं पन्थाः' इति चतुष्पदा विराड्जगती । १७ 'वात इव', २०'स्वायसा' इति प्रस्तारपंक्तिर्द्वितीया विराट् । १६'पराक् ते', १८ यां ते बर्हिषि' इति त्रिष्टुभौ । १९'उपाहृतम्' इति चतुष्पदा जगती । २२'सोमो राजा' इत्येकावसाना, द्विपदार्च्युष्णिक् । २३'भव शर्वौ' इति त्रिपदा भुरिग्विषमा गायत्री । २४'यद्येयथ' इति प्रस्तारपंक्तिः । २८'एतद्धि' इति त्रिपदा गायत्री । २९'अनागो हत्या' इति मध्येज्योतिष्मती जगती । ३२'यथा सूर्य'इति द्व्यनुष्टुब्गर्भा पञ्चपदातिजगतीति ॥ १ ॥

१० । २ । १'केन पार्ष्णी' इति त्रयस्त्रिंशत् पार्ष्णीसूक्तं नारायणः । पौरुषमानुष्टुभमाद्याश्चतस्रो, ७ हन्वोर्हि' इति द्वे त्रिष्टुभः । ६'कः सप्त खानि', ११'को अस्मिन्नापः' इति जगत्यौ । २८'ऊर्ध्वो नु सृष्टाः' इति भुरिग्बृहती । इदं ब्रह्मप्रकाशिसूक्तम् । ३१'अष्ट चक्रा' इति द्वे साक्षात् परं ब्रह्म प्रकाशिन्याविति ॥

* यह लेख हमारा है ।

१० । ३ । १ 'अयं मे वरणः' इति पंचविंशकमथर्वामंत्रोक्तवरणदेवत्यमुत वानस्पत्यं चान्द्रमसमानुष्टुभम् । २ 'प्रैणान् छृणीहि' इति द्वे, ६ 'स्वप्नं सुप्त्वा' इति भुरिक्त्रिष्टुभः । ८ 'यन्मे माता' इति पथ्यापंक्तिः । ११ 'अयं मे वरणः', १६ 'तांस्त्वम्' इति भुरिजौ । १३ 'यथा वातो वनस्पतीन्' इति द्वे पथ्यापंक्ती । १४ 'यथा वातः' इति १७ 'यथा सूर्यः' इति प्रभृति, २५ 'यथा देवेष्वमृतम्' इति षट्पदा दश जगत्य इति ॥ २ ॥

१० । ४ । १ 'इन्द्रस्य प्रथमः' इति षड्विंशतिः । गरुत्मान् तक्षकदैवतमानुष्टुभम् । आद्या पथ्यापंक्तिः । २ 'दर्भः शोचिः' इति त्रिपदा यवमध्यागायत्री । ३ 'अव श्वेत' इति द्वे पथ्याबृहत्यौ । ८ 'संयतम्' इत्युष्णिग्गर्भा परा त्रिष्टुप् । १२ 'नष्टासवः' इति भुरिग्गायत्री । १६ 'इन्द्रेमे* हिम्' इति त्रिपदा प्रतिष्ठागायत्री । २१ 'ओषधीनामहम्' इति ककुम्मती । २३ 'ये अग्निजा' इति त्रिष्टुप् । २६ 'आरे अभूत्' इति त्र्यवसाना षट्पदा बृहतीगर्भाककुम्मती भुरिक्त्रिष्टुबिति ॥ ३ ॥

१० । ५ । †१ 'इन्द्रस्यौज' इति चतुर्विंशतिः सिन्धुद्वीपः ।

---

* आदर्श पुस्तकों में पाठ 'इन्द्रे मेहीति' है परन्तु मूलसंहिता में 'मेहिम्' पाठ जान हमनें स्वयं पाठ शुद्ध किया है ।

† अथर्व संहिता में यह सूक्त ५० मंत्रों का है । अनुक्रमणी में यहां २४ मंत्रों का भिन्न सूक्त है । शेष आवन्तर सूक्तों के मंत्रों को साथ मिलाकर ये ५० ऋचायों वाला सूक्त बनाया है । हम अनुक्रमणी के अनुकूल भिन्न २ सूक्त देंगे ।

आप्यमुतचान्द्रमसमानुष्टुभमाद्या पञ्च त्रिपदाः, पुरोऽभिकृतयः ककुम्मतीगर्भाः पंक्तयः। ६'विश्वानि मा' इति चतुष्पदा जगतीगर्भा जगती। ७'अग्नेर्भाग स्थ' इत्यष्टौ त्र्यवसानाः पंचपदा विपरीतपादलक्ष्मा बृहत्यः। ११तत्र 'मित्रावरुणयोः' १४'देवस्य सवितुः' इति *द्व पथ्यापंक्ती। १५'यो व आपोपां भागः' इति सप्त चतुरवसाना दशपदा मंत्रोक्तदेवत्यास्त्रैष्टुब्गर्भा अतिधृतयः। तत्र १९'हिरण्यगर्भः', २०'पृश्निः' इति† कृती। २४'अरिप्रा आपः' इति त्रिपाद्विराड्गायत्री॥

१०।६।‡१(२६)'विष्णोः क्रमोसि' इत्येकादश त्र्यवसानाः कौशिका विष्णुक्रमदेवत्या उत प्रतिमंत्रोक्तदेवत्याः षट्पदा यथाक्षरंशक्वर्यतिशक्वर्यौ (३६) १'जितमस्माकम्' इति मार्त्वी पञ्चपदातिशाक्वरातिजागतगर्भाष्टिः॥

१०।७।(३७)†१'सूर्य्यस्यावृतम्' इति पञ्च ब्रह्मा प्रति-

---

* 'द्व' से १५ मंत्र ग्रहण करना ठीक नहीं क्योंकि इसका छन्द भिन्न कहा है अतः यह पद चिन्तनीय है। पंक्ती का द्विवचनरूप हमारा है। मूल में पंक्तिः पद है।

† 'कृती' यह द्विवचन रूप भी हमारा है। मूल पुस्तकों में पाठ कृतिः है।

‡ १०।५ सूक्त क्रम में यह मंत्र २६ वां है। भिन्न सूक्त क्रम में प्रथम। अथर्व संहिता में जो १०।५ सूक्त ५० ऋचाओं का है उसके अनुक्रमणिका के अनुसार ४ सूक्त भिन्न २ बने हैं। संहिता का मंत्र क्रम भी साथ हमने बंधनी में दे दिया है।

मंत्रोक्तदेवत्याः । प्रथमा विराट्पुरस्ताद्बृहती । (३८) २'दिशो ज्योतिष्मतीः' इति पुर उष्णिक् । (३६] ३'सप्त ऋषीन्', [४१] ५'ब्राह्मणान्' इति* द्वे आर्षीगायत्र्यौ। [४०] ४'ब्रह्माभ्या' इति विराड्विषमागायत्री ॥ ४ ॥

१० । ८ । [४२] १'यं वयम्' इति नवर्चं विहव्यः प्राजापत्या अनुष्टुभः । [४४] ३'राज्ञो वरुणस्य' इति त्रिपाद्गायत्री गर्भानुष्टुप् । [५०] ६'अपामस्मै' इति त्रिष्टुप् ॥

१० । †६ (६) १'अरातीयोः' इति पञ्चत्रिंशद्बृहस्पतिः। मंत्रोक्तफालमणिदेवत्यमुत वानस्पत्यमानुष्टुभम्। आद्या, ४'हिरण्य स्रक्' इति गायत्र्यौ । ३'यत् त्वा शिक्वः' इत्याप्या । ५'तस्मै घृतम्' इति षट्पदा जगती । ६'यमबध्नात्बृहस्पतिर्मणिम्' इति प्रथमा सप्तपदा विराट्शक्वरी । ७'तमिन्द्रः' इति चतस्त्र-स्त्र्यवसाना अष्टपदा अष्टयः, अन्त्या नवपदा धृतिः । ११'बृहस्पतिर्वाताय' इति पथ्यापंक्तिः । १२'तनेमां मणिनाकृषिम्' इति षट् त्र्यवसानाः षट्पदाः शक्वर्यः । २०'अथर्वाणो अबध्नत' इति पथ्यापंक्तिः । २१'तं धाता' इति गायत्री । २३'अगमत् सह गोभिः' इति पञ्च पथ्यापंक्तयः । 'उत्तरं द्विषत' इति त्र्यवसाना षट्पदा जगती । ३१'एतमिध्म' इति पंचपदा ‡त्र्यनुष्टुब्गर्भा जगतीति ॥ ५ ॥

---

* यहां भी 'द्वे' पद चिन्तनीय है। † प्रकाशित संहिता क्रम वन्धनी में दिया है।

‡ क. ङ. त्र्यनु पढ़ा जाता है, वी. में 'पदानु' लिखा है । ह्वि० ने भी त्र्यनुष्टुब्गर्भा पाठ लिखा है।

१०।१० (७) १'कस्मिन्नङ्गे' इति चतुश्चत्वारिंशदथर्वा क्षुद्रो मंत्रोक्तस्कम्भोऽध्यात्मदेवत्यंत्रैष्टुभम् । प्रथमा विराड्जगती । २'कस्मादङ्गाद् दीप्यते', ८'यत्परममवमम्' इति भुरिजौ । ७'यस्मिन्स्तब्ध्वा' इति परोष्णिक् । १०'यत्र लोका' इत्युपरिष्टाद्बृहती । ११'यत्र तपः' इति द्वे, १५'यत्रामृतश्च, २०'यस्माद्दचः' इत्युपरिष्टात्ज्योतिर्जगत्यः । १३'यस्य त्रयस्त्रिंशद् देवा अङ्गे सर्वे' इति परोष्णिक् । १४'यत्रऋषयः', १६'यस्य चतस्रः, १८'यस्य शिरः' द्वे उपरिष्टाद्बृहत्यः । १७'ये पुरुषे' इति त्र्यवसाना षट्पदा जगती । २१'असच्छाखाम्' इति बृहतीगर्भानुष्टुप् । २२'यत्रादित्यश्च' इत्युपरिष्टाज्ज्योतिर्जगती । २३'यस्य त्रयस्त्रिंशद्देवा निधिम्' इत्यष्टावनुष्टुभ* इति ॥ ६ ॥

३१'नाम नाम्ना' इति मध्येज्योतिर्जगती । ३२'यस्य भूमिः, ३४'यस्य वातः', ३६'यः श्रमात्' इत्युपरिष्टाद्विराड्बृहत्यः । ३३'यस्य सूर्य्यः' इति †परा विराडनुष्टुप् । ३५'स्कम्भो दाधार' इति चतुष्पदा जगती । ३७कथं वातः', ४०'अप तस्य' इत्यनुष्टुभौ । ३८'महद्यक्षम्' इति त्रिष्टुप् । ३९'यस्मै हस्ताभ्याम्' इत्युपरिष्टाज्ज्योतिर्जगती । ४१'यो वेतसम्' इत्यार्षी त्रिपाद्गायत्री । ४२'तन्त्रमेके' इति द्वे त्रिष्टुभौ । ४'इमे मयूखाः' इत्येकावसाना पंचपदा निचृत्पदपंक्तिरार्च्यनुष्टुप्, द्विपदा वा पंचपदा निचृत्पदपंक्तिरिति ॥ ७ ॥

---

* क. ङ. इति नहीं ॥

† क. ङ. द्वि० पर ॥

१०।११(८)१'यो भूतम्' इति चतुश्चत्वारिंशत्, कुत्सोऽध्यात्मदैवत्यं त्रैष्टुभम्। आद्योपरिष्टाद्विराड्बृहती। २'स्कम्भेनेमे' इति बृहतीगर्भानुष्टुप्। ५'इदं सवितः' इति भुरिगनुष्टुप्। ६'आविः सन्निहितम्' इत्यनुष्टुप्। ७'एक चक्रम्' इति पराबृहती। १०'या पुरस्तात्' इत्यनुष्टुब्गर्भा। ११'यदेजति' इति जगती। १२'अनन्तं विततम्' इति पुरोबृहती त्रिष्टुब्गर्भार्षीपंक्तिः।१४'ऊर्ध्वं भरन्तम्', १६'सत्येन' इति द्वे, अनुष्टुभः। १५ दूरे पूर्णेन' इति भुरिग्बृहती। २१'अपादग्रे', २३ सनातनम्', २५'बालादेकम्', २६'पूर्णात्पूर्णम्' इत्यनुष्टुभः। २२'भाग्यः' इति पुर उष्णिक्। २६'इयं कल्याणि' इति द्व्युष्णिग्गर्भानुष्टुप्। २७'त्वं स्त्री' इति भुरिग्बृहती। ३०'एषा सनत्नी' इति भुरिक्। ३१'अविर्वै नाम' इति चतस्रः, ३७'यो विद्यात् सूत्रम्' इति द्वे, ४१'उत्तरेणेव' ४३ पुण्डरीकं नवद्वारम्' इत्यनुष्टुभः। ३६'यदन्तरा द्यावापृथिवी' इति बृहतीगर्भा। *४२'निवेशनः' इति विराड्गायत्रीति॥ ८॥

१०।१२(६) १'अग्रायताम्' इति सप्तविंशतिरथर्वामंत्रोक्तशतौदनदैवत्यमानुष्टुभम्। आद्यात्रिष्टुप्। १२'ये देवाः' इति पथ्यापंक्तिः। २५'क्रोडौ ते स्ताम्' इति द्व्युष्णिग्गर्भानुष्टुप्। २६'उलूखले मुसले' इति पंचपदा बृहत्यनुष्टुबुष्णिग्गर्भा जगती। २७'अपो देवीः' इति पञ्चपदाति जागताऽनुष्टुब्गर्भाशक्करी॥

---

* १०।८।४२ ऋ० १०।१३६।३ में अल्प भेद से आया है ऋषि विश्वावसुर्देवगन्धर्व है।

१०।१३(१०)१ 'नमस्ते जायमानायै' इति चतुस्त्रिंशत्कश्यपो मंत्रोक्तवशादेवत्यमानुष्टुभमाद्या ककुम्मती। ५ 'शतं कंसाः' इति पञ्चपदातिजागतानुष्टुभं स्कंधोग्रीवीबृहती। ६ 'यज्ञपदीः', ८ 'अपस्त्वं', १० 'यदनूची' इति विराजः। २३ 'सर्वेगर्भात्' इति बृहती। २४ 'युधः एकः' इत्युपरिष्टाद्बृहती। २६ वशामेव' इत्यास्तार पंक्तिः। २७ 'य एवं विद्यात्' इति शङ्कुमती। २९ 'चतुर्धा रेतः' इति त्रिपदा विराड्गायत्री। ३१ 'वशाया दुग्धं पीत्वा' इत्युष्णिग्गर्भा। ३२ 'सोममेनाम्' इति विराट्पथ्या बृहती॥ ६॥

(अथैकादशं काण्डम्)

११ । १ । १‘अग्ने जायस्व’ इति सप्तत्रिंशदृब्रह्मौद*निकं, त्रैष्टुभमाद्यानुष्टुब्गर्भा भुरिक्पंक्तिः । २‘कृणुत धूमम्’ इति बृहतीगर्भाविराट् । ३‘अग्ने जनिष्ठा’ इति चतुष्पदा शाक्करगर्भा-जगती । ४‘समिद्धो अग्ने’ इति भुरिक् । ५‘त्रेधा भागः’ इति बृहतीगर्भा विराट् । ६‘अग्ने सहस्वान्’ इत्युष्णिक् । ८‘इयं मही’ इति विराड्गायत्री । ९‘एतौ ग्रावाणौ’ इति शाक्करातिजागत-गर्भा† जगती । १०‘गृहाण ग्रावाणौ’ विराट्पुरोऽतिजगती विराड्जगती ।११ ‘इयं ते धीतिः’ इति जगती। १५‘ऊर्जो भागः’ इति द्वे भुरिजौ । १७‘शुद्धाः पूताः’ इति विराड्जगती । १८‘ब्रह्मणा शुद्धाः’ इत्यतिजागतगर्भा परा तिजागताविराडति-जगती । २०‘सहस्र पृष्ठः’ इत्यतिजागतगर्भा‡ परा शाक्करा चतुष्पदा भुरिग्जगती ॥ १० ॥

२१‘उदेहि वेदिम्’ इति, २४‘अदितेर्हस्ताम्’ इति तिस्रो, २६‘अग्नौ तुषान्’ इति विराड्जगत्योऽन्त्या भुरिक् । २७‘शुद्धाः पूताः’इत्यतितजागतगर्भा§ जगती। ३१‘बभ्रेरध्वर्यो’इति भुरिक्।

---

* ङ. बी ‘दनीकं’ ।

† ङ. ‘गर्भानुजगती’ ।

‡ क. गु. ‘पर’ ।

§ बी. गर्भा भुरिग्जगती।

३५ 'वृषभोसि' इति चतुष्पात्ककुम्मत्युष्णिक्। ३६ 'स मा चिनुष्व' इति पुरोविराट् व्याघ्रादिष्ववगंतव्या । ३७ 'येन देवाः' इति विराड्जगती ॥

११।२। '१भवाशर्वौमृडतम्' इत्येकत्रिंशदर्थवा मंत्रोक्तरुद्रदैवतं त्रैष्टुभम्। या यद्देवत्येति पारिभाषिकमनुस्मर्यते सर्वत्र। आद्या परातिजागताविराड्जगती । २ 'शुने क्रोष्ट्रे' इत्यनुष्टुब्गर्भा पञ्चपदा तथा जगती । ३ 'क्रन्दाय ते' इति चतुष्पात्स्वराडुष्णिक्। ४ 'पुरस्तात् ते' इति द्वे, ७ 'अस्ना नील शिखण्डेन इत्यनुष्टुभः । ६ 'अङ्गेभ्यस्ते' इत्यार्षीगायत्री । ८ 'स नो भव' इति महाबृहती । ९ 'चतुर्नमः' इत्यार्षी । १० 'तव चतस्रः' इति पुरः कृतिस्त्रिपदा विराडिति ॥ ११ ॥

११ 'उरुः कोशः' इति पञ्चपदा विराड्जगतीगर्भा शक्करी। १२ 'धनुर्बिभर्षि' इति भुरिक्। १३ 'यो ३ भियातः', १५ 'नमस्ते' इति द्वे अनुष्टुभः* । १४ 'भवारुद्रौ', १७ 'सहस्राक्षमतिपश्यम्' इति तिस्रो विराड्गायत्र्यः† । २० 'मानो हिंसीः' इति भुरिग्गायत्री। २१ 'मानो गोषु' इत्यनुष्टुप् । २२ 'यस्य तवमा' इति विषमपादलक्ष्मा‡ त्रिपदा महाबृहती। २३ 'योऽन्तरिक्षे', २६ 'मा नो रुद्र' इति द्वे विराड्गायत्र्यः§ । ‖२९ 'मा नो महान्तम्',

* ङ. 'भौ'।

† ङ. त्र्यौ।

‡ क. ग. लक्ष्मा। ङ. द्वि० लक्ष्म्या।

§ ङ. त्र्यौ।

‖ ११।२।२९ ऋ० १।११४।७ में है ऋषि कुत्सआंगिरस है

२४'तुभ्यमारण्या:' इति जगत्यौ । २५'शिशुमारा:' इति* पञ्च-पदाति शक्करी । ३०'रुद्रस्यैलवकारेभ्य:' इति चतुष्पादुष्णिक् । ३१'नमस्ते घोषिणीभ्य:' इति त्र्यवसाना विपरीतपादलक्ष्मा षट्पादिति† ॥ १२ ॥

११ । ३ । प० १

१'तस्यौदनस्य' इति त्रयः पर्यायास्तत्र पूर्वमेकत्रिंशद् बार्हस्पत्यौदनदेवत्या: । १४'ऋचा कुम्भी' इत्यासुरी गायत्र्यौ । २'द्यावापृथिवी श्रोत्रे' इति त्रिपदा समविषमा गायत्री । ३'चक्षुर्मुसलं', ६'कब्रुफलीकरणा:', १०'आन्त्राणि' इत्यासुरी-पंक्तयः । ४'दितिः शूर्पं', ८'त्रपुभस्म' साम्न्यनुष्टुभौ । ५'अश्वाः कणा:', १३'ऋतं हस्तावनेजनं', १५'ब्रह्मणा परिगृहीता' २५'यावद् दाता' साम्न्युष्णिहः । ७'श्याम मयः', १९'ओदनेन' इति चतस्रः प्राजापत्यानुष्टुभः । ९'खलः पात्रं', १७'ऋतवः' इति द्वे आसुर्यनुष्टुभः । ११'इयमेव पृथिवी' इति भुरिगार्च्य-नुष्टुप् । १२'सीताः पर्शवः' इति याजुषीजगती । १६'बृहदा-यवनम्', २३'स य ओदनस्य' इत्यासुरीबृहत्यौ । २४'नाल्प' इति त्रिपदा प्राजापत्या बृहती । २६'ब्रह्मवादिनः' इत्यार्च्युष्णिक् । २७'त्वमोदनम्' इति साम्नीबृहती, द्वितीया भुरिक् । ३०'नैव'

---

* ङ. गु में इति के आगे द्वे पाठ अधिक है ।

† ह्वि० में इति के आगे जगती पाठ दिया है ।

इति याजुषीत्रिष्टुप् । ३१'ओदन एव' अल्पशः पंक्तिरुत याजुषीति ॥ १३ ॥

११ । ३ । प० २ ।

†१'ततश्चैनम्' इति द्वासप्ततिर्मन्त्रोक्त देवत्याः । प्रथमा सर्वांग एव । ३८'एनमन्यैः प्राणापानैः', ४१'अन्येनोरसा' इति च साम्नी त्रिष्टुभौ‡ । ३२'ज्येष्ठतः , 'तं वा अहं', ताभ्यामेनं ३५'मुखतस्ते', ४२'उदरदारः', एकपदा§ आसुरी गायत्र्यः । ३२ बृहस्पतिना' ४३'समुद्रेण' इति दैवीजगत्यौ । ३५'तेनैनं', ३६'तयैनं', ३७'तैरेनं', ३८'प्राणापानस्त्वा', ४४'उरू ते', ४६'बहुचारी' एकपदा आसुर्यनुष्टुभः । ४६'एष वा ओदनः' इति साम्न्यनुष्टुप् । ३३'एनमन्याभ्यां श्रोत्राभ्याम्' इत्यादितः

---

† इस द्वितीय पर्य्याय में प्रकाशित मूल संहिताओं की मन्त्र संख्या १८ है । इनको बृहत्०के पटल ७।१४ के अन्त में 'दण्डक' कहा गया है । इन १८ दण्डकों में ७२ अवसान हैं । पञ्चपटलिका (द्वासप्तति परः ॥ १६ ॥) तथा बृहत्० दोनों इस विभाग में सहमत हैं । शङ्करपाण्डुरङ्ग ने स्वकीय संस्करण के तृतीय भाग पृ० ३५६ के आगे इन १८ दण्डकों को ७२ अवसानों में विभक्त करके छापा है ।

‡ आदर्श पुस्तकों में त्रिष्टुभः पाठ है ।

§ मूल पुस्तकों में 'एकपदासुरी' है ।

सप्तदशार्च्यनुष्टुभः । ३७‘ततश्चैनमन्यैर्दन्तैः’ इति साम्नीपंक्तिः । ३३‘बधिरो भविष्यसि’, ३६‘जिह्वा ते’,४०‘विद्युत् त्वा’, ४७‘सर्पस्त्वा’, ४८‘ब्राह्मणं हनिष्यसि’ इत्यासुरी जगत्यः । *३४‘अन्धो भविष्यसि’, ३७ दन्तास्ते’, ४१‘कृष्या न रात्स्यसी’, ४३‘अप्सु-मरिष्यसि’, ४५‘स्रामो भविष्यसि’, इत्यासुरी पंक्तयः । ३४‘सूर्या-चन्द्रमसाभ्याम्’ इत्यासुरी त्रिष्टुप् । ३५ ब्रह्मणा मुखेन’. ४६‘अ-श्विनोः पादाभ्याम्’, ४८‘ऋतस्य हस्ताभ्यां’ इति याजुषी गायत्र्यः । ३६‘अग्नेर्जिह्वया’, ३७ ऋतुभिर्दन्तैः’, ४१‘दिवा पृष्ठेन’ इति दैवी पंक्तयः । ३८‘सप्तर्षिभिः प्राणापानैः’,३६‘अन्त-रिक्षेण व्यचसा’ इति प्राजापत्या गायत्र्यः । ३६‘राजयक्ष्मस्त्वा’ आसुर्युष्णिक् । ४१‘पृथिव्योरसा’, ३७‘सवितुः प्रपदाभ्यां’ दैवी-जगत्यौ । ४२‘सत्येनोदरेण’, ४५ त्वष्टुरष्ठीवद्भ्याम्’, ४६‘सत्ये-प्रतिष्ठाय’ इति दैवीत्रिष्टुभः । ४६‘अप्रतिष्ठानः’, एकपदा भुरिक् साम्नी बृहतीति । यदैते पर्य्यायसूक्तमंत्रा जपकर्मणि प्रयुज्यंते, तदाधिकारान्तानेतान् विजानीयात् । तदा तथा छन्दस्येता अष्टादश दण्डका भवन्ति । ‘सोदक्रामत्’, ‘य एवं विद्वान्’ इत्या-दिषु यथाक्षरं यथा तथाधिकारांतं गायत्र्यादि कृति, धृति, पथ्यापंक्त्यादि छन्दः प्रयुंज्यादिति ॥ १४ ॥

---

‡ मूल पुस्तकों में ‘जगत्यावंधो’ पाठ है । उपर्युक्त पाठ स्वयं दिया है ।

११ । ३ । प० ३ ।

५० 'एतद्वै ब्रध्नस्य' इति सप्तको मंत्रोक्तदेवत्यस्तत्राद्यासुर्यनुष्टुप् । ५१ 'ब्रध्नलोकः' इत्यार्च्युष्णिक् । ५२ 'एतस्माद्वा' इति त्रिपदा भुरिक्साम्नीत्रिष्टुप् । ५३ 'तेषां प्रज्ञानाय' इत्यासुरीबृहती । ५४ 'स य एवं विदुषः' इति द्विपदा भुरिक्साम्नीबृहती । ५५ 'न च प्राणम्' इति साम्न्युष्णिक् । ५६ 'न च सर्वज्यानिम्' इति प्राजापत्या बृहती ॥

११ । ४ । १ 'प्राणाय नमः' इति षड्विंशकं भार्गवो वैदर्भिर्मन्त्रोक्तप्राणदेवत्यमानुष्टुभमाद्या शंकुमती । ८ 'नमस्ते प्राण प्राणते' इति पथ्यापंक्तिः । १४ 'अपानति' इति निचृत् । १५ 'प्राणमाहुः' इति भुरिक् । २० 'अन्तर्गर्भः' इत्यनुष्टुब्गर्भा-त्रिष्टुप् । २१ 'एकं पादम्' इति मध्येज्योतिर्जगती । २२ 'अष्टाचक्रम्' इति त्रिष्टुप् २६ 'प्राण मा मत्' इति बृहतीगर्भेति ॥ १५ ॥

११ । ५ । १ 'ब्रह्मचारीष्णन्' इति षड्विंशकं ब्रह्मा मंत्रोक्त ब्रह्मचारी देवत्यम् त्रैष्टुभमाद्या पुरोऽति जागता विराड्गर्भा । २ 'ब्रह्मचारिणं पितरः' इति पञ्चपदा बृहतीगर्भा विराट्शक्करी परा उरोबृहती । ६ 'ब्रह्मचार्येति समिधा' इति शाक्करगर्भा चतुष्पदा जगती । ७ 'ब्रह्मचारी जनयन्' इति विराड्गर्भा । ८ 'आचार्यस्ततक्ष' इति पुरोऽति जागता विराड्जगती । ६ 'इमां भूमिम्' इति बृहतीगर्भा । १० 'अर्वागन्यः परः' इति भुरिक् । ११ 'अर्वा-

* ११ । ४ । २२ ऋ० १० । ८ । ७ ।

गन्य इतः' इति जगती । १२ 'अभिक्रन्दन्' इति शाक्करगर्भा* चतुष्पाद्विराडति जगती । १३ 'अग्नौ सूर्य्ये' इति जगती । १५ 'अमा घृतम्' इति पुरस्ताज्ज्योतिः । १४ आचार्योमृत्युर्वरुणः', १६ 'आचार्यो ब्रह्मचारी' इति सप्तानुष्टुभः । २३ 'देवानामेतत्' इति पुरोबार्हतातिजागतगर्भा । २५ 'चक्षुः श्रोत्रम्' इत्येकावसानार्च्युष्णिक् । २६ 'तानि कल्पत्' इति मध्येज्योतिरुष्णिग्गर्भा ॥

११ । ६ । १ 'अग्नि ब्रूमः' इति त्रयोविंशकं शंतातिश्चान्द्रमसमुत मंत्रोक्तदेवत्यमानुष्टुभम् । २३ 'यन्मातली रथक्रीतम्' इति बृहतीगर्भेति ॥ १६ ॥

११ । ७ । १ 'उच्छिष्टे नाम रूपम्' इति सप्तविंशतिरथर्वा मंत्रोक्तोच्छिष्टोऽध्यात्म दैवतमानुष्टुभम् । ६ 'एन्द्राग्नं पवमानम्' इति पुरोष्णिग्बार्हत परा । २१ 'शर्कराः सिकताः' इति स्वराट् । २२ 'राद्धिः प्राप्तिः' इति विराट्पथ्याबृहती ॥

११ । ८ । १ 'यन्मन्युः' इति चतुस्त्रिंशत्कौरुपथिरध्यात्ममन्युर्दैवतमानुष्टुभम् । ३३ 'प्रथमेन प्रमारेण' इति पथ्यापंक्तिः ॥

११ । ६ । १ 'ये बाहवः' इति षड्विंशकं कांकायनो मंत्रोक्तार्बुदिदेवत्यमानुष्टुभमाद्या सप्तपदा विराट्शक्करी त्र्यवसाना । ३ 'उत्तिष्ठतमारभेथाम्' इति परोष्णिक् । ४ 'अर्बुदिर्नाम' इति त्र्यवसानोष्णिग्बृहतीगर्भा परा त्रिष्टुप् षट्पदाति जगती ।

---

* ङ. बो. में 'गर्भापरा' चतुष्पात् है । परञ्च क. घ. द्वि में परा नहीं ।

